CAREERINDIA

**CCE PF**
**CCE PR**

ಸಂಕೇತ ಸಂಖ್ಯೆ : **67-S** ವಿಷಯ : ತೃತೀಯ ಭಾಷೆ — ಸಂಸ್ಕೃತ

**Code No. : 67-S** तृतीय भाषा — संस्कृतम्

**Subject : Third Language — SANSKRIT**

( ಹೊಸ ಪಠ್ಯಕ್ರಮ / New Syllabus )

( ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿ + ಪುನರಾವರ್ತಿತ ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿ / Private Fresh + Private Repeater )

*ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :*

i) ಇದು ಪ್ರಶ್ನೆ–ಸಹಿತ–ಉತ್ತರಪುಸ್ತಕವಾಗಿದೆ.

ii) ಪ್ರತಿ ಪ್ರಶ್ನೆಗೂ ಉತ್ತರ ಬರೆಯಲು ಪ್ರಶ್ನೋತ್ತರ ಪತ್ರಿಕೆಯಲ್ಲಿಯೇ ಸ್ಥಳಾವಕಾಶ ಮಾಡಿಕೊಡಲಾಗಿದೆ. ಉತ್ತರಗಳನ್ನು ನಿರ್ದಿಷ್ಟಪಡಿಸಿದ ಜಾಗದಲ್ಲಿಯೇ ಬರೆಯಬೇಕು.

iii) ಈ ಪ್ರಶ್ನೋತ್ತರ ಪತ್ರಿಕೆಯು ***A, B, C ವಿಭಾಗ***ಗಳಿಂದ ಕೂಡಿದ್ದು ಒಟ್ಟು 57 ಪ್ರಶ್ನೆಗಳನ್ನೊಳಗೊಂಡಿದೆ.

***'A' ವಿಭಾಗ***ದಲ್ಲಿ ಗದ್ಯ, ಪದ್ಯ, ಪೂರಕ ಪಾಠಗಳಿಗೆ ಸಂಬಂಧಿಸಿದ 38 ಪ್ರಶ್ನೆಗಳಿವೆ.

***'B' ವಿಭಾಗ***ದಲ್ಲಿ ವ್ಯಾಕರಣಕ್ಕೆ ಸಂಬಂಧಿಸಿದ 14 ಪ್ರಶ್ನೆಗಳಿವೆ.

***'C' ವಿಭಾಗ***ದಲ್ಲಿ ರಚನಾ ವಿಭಾಗಕ್ಕೆ ಸಂಬಂಧಿಸಿದ 5 ಪ್ರಶ್ನೆಗಳಿವೆ.

iv) ವಿದ್ಯಾರ್ಥಿಗಳು ಸೀಸದ ಕಡ್ಡಿ (ಪೆನ್ಸಿಲ್) ಯಿಂದ ಉತ್ತರಗಳನ್ನು ಬರೆಯಬಾರದು. ಪೆನ್ಸಿಲ್‌ನಿಂದ ಉತ್ತರ ಬರೆದಲ್ಲಿ ಮೌಲ್ಯಮಾಪನಕ್ಕೆ ಪರಿಗಣಿಸಲಾಗುವುದಿಲ್ಲ.

v) ಪ್ರಶ್ನೆ ಪತ್ರಿಕೆಯನ್ನು ಓದಲು 15 ನಿಮಿಷಗಳ ಹೆಚ್ಚಿನ ಕಾಲಾವಕಾಶ ನೀಡಲಾಗಿದೆ.

vi) ನಿಮ್ಮ ಪ್ರಶ್ನೋತ್ತರ ಕಿರುಪುಸ್ತಕದ ಬಲಭಾಗದಲಿರುವ ಗೆರೆಯ ಪಕ್ಕದ ಖಾಲಿ ಜಾಗದಲ್ಲಿ ಯಾವುದೇ ರೀತಿಯ ಬರಹಗಳನ್ನು ಬರೆಯಬಾರದು.

www.careerindia.com

CAREERINDIA



***परीक्षार्थिनां सामान्याः सूचना :***

i) इदं प्रश्नयुक्तम् उत्तरपुस्तकम् अस्ति ।

ii) अस्मिन् प्रश्नयुक्ते उत्तरपुस्तके प्रत्येकं प्रश्नस्य उत्तरं लेखितुं स्थलावकाशः प्रकल्पितः । निर्दिष्टस्थानेषु एव उत्तराणि लेखनीयानि ।

iii) अस्मिन् प्रश्नयुक्त उत्तरपुस्तके ***A, B, C*** इति भागत्रयं भवति । आहत्य 57 प्रश्नाः भवन्ति ।

***'A'*** विभागे गद्य-पद्य-पूरकपाठसम्बन्धिनः 38 प्रश्नाः भवन्ति ।

***'B'*** विभागे व्याकरणसम्बन्धिनः 14 प्रश्नाः भवन्ति ।

***'C'*** विभागे रचनासम्बन्धिनः 5 प्रश्नाः भवन्ति ।

iv) परीक्षार्थिनः उत्तराणि अङ्कनी (पेन्सिल्) द्वारा न लिखेयुः । पेन्सिल् द्वारा लिखितानि उत्तराणि मौल्यमापनार्थं न परिगण्यन्ते ।

v) परिक्षार्थिभ्यः प्रश्नानां पठनार्थम् अर्थग्रहणार्थं च पञ्चदशनिमेषकालावकाशः अधिकः प्रदत्तः ।

vi) दक्षिण पार्श्वे आरक्षित स्थाने किमपि न लेखनीयम् ।

www.careerindia.com

CAREERINDIA



## भागः - A

### ( गद्यम्-पद्यम्-पूरकपाठाः )

I. एकवाक्येन उत्तरं लिखत — 14 × 1 = 14

1. वामनः किमर्थं विरामम् इच्छति ?
2. पठनार्थं का आवश्यिका ?
3. स्वामी विवेकानन्दः कुत्र गतवान् ?
4. अर्जुनः अन्ते किं ज्ञातवान् ?
5. सीतां कः अपहृतवान् ?
6. विक्रमार्कः होमस्य पूर्णाहुतिसमये किम् अकरोत् ?
7. त्रयः योगाः के ?
8. कः ज्ञानं लभते ?
9. दिलीपः कया सदृशागमः आसीत् ?
10. अक्षयाः निधयः कति सन्ति ?
11. मेलुकोटे कस्मिन् मण्डले अस्ति ?
12. सर्वदमनस्य पिता कः ?
13. ढुण्ढिराजः कः ?
14. पूज्यनदी का ?

II. रिक्तस्थानानि पूरयत — 3 × 1 = 3

15. प्रति सायं .................................... कार्यक्रमाः आसन् ।
16. बिट्टिदेवस्य पुत्री .................................... पीडिता ।
17. सर्वदा .................................... अस्माकम् ।



www.careerindia.com

CAREERINDIA



III. संयोज्य लिखत – 4 × 1 = 4

| अ | | आ | |
|---|---|---|---|
| 18. | क्रीडनकम् | a) | भीष्मपर्वणि |
| 19. | भगवद्गीता | b) | सम्प्रदायः |
| 20. | शुभाशुभम् | c) | मृत्तिकामयूरः |
| 21. | परम्परा | d) | आत्मकर्म |
| | | e) | नाटकम् |
| | | f) | पादपाः । |

IV. **द्वि-त्रैः** वाक्यैः संस्कृतभाषया उत्तरं लिखत – 3 × 2 = 6

22. पुस्तकमेलायाः वेदिकायां के कार्यक्रमाः अभवन् ?

23. पञ्च अचोरहरणीयानि कानि ?

**अथवा**

अर्जुनः कृष्णं किम् अपृच्छत् ?

24. कृष्णः अर्जुनं कथं समाधत्ते ?

V. श्लोकतात्पर्यं कन्नडभाषया आंग्लभाषया वा लिखत – 2 × 2 = 4

25. अशनं भिन्नं वसनं भिन्नं रूपं भिन्नं रीतिरपि ।
भिन्नं भाग्यं भिन्नो वर्णः भिन्नं सर्वं भेददृशे ।।

26. व्यूढोरस्को वृषस्कन्धः शालप्रांशुमहाभुजः ।
आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः ।।

**अथवा**

चतुर्विधा भजन्ते मां जनास्सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ।।

VI. संस्कृतभाषया अनुवादं कुरुत – 2

27. ಮಹಾಭಾರತದ ಭೀಷ್ಮಪರ್ವದಲ್ಲಿ ಭಗವದ್ಗೀತೆ ಇದೆ. ಇದನ್ನು ಶ್ರೀಕೃಷ್ಣನು ಅರ್ಜುನನಿಗೆ ಉಪದೇಶಿದನು.

कर्नाटकभाषया अनुवादं कुरुत – 2

28. पुरा भोजराजस्य सभायाम् अनेके कवयः आसन् । तेषाम् एकः कालिदासः नाम ।

www.careerindia.com

CAREERINDIA



VII. कवेः देश-काल-ग्रन्थानां विषये लिखत – 3

29. भोजराजः

**अथवा**

कालिदासः ।

VIII. यथानिर्देशम् उत्तरं लिखत – 3 × 3 = 9

30. ''राजन् तुष्टास्मि वरं वृणीष्व''

कः पाठः ? का अवदत् ? कम् अवदत् ?

31. ''हन्त ! वर्धते ते संरम्भः''

कः पाठः ? का अवदत् ? कम् अवदत् ?

32. ''मया एतानि सर्वाणि पुस्तकानि पठितानि''

कः पाठः ? कः अवदत् ? कम् अवदत् ?

IX. कर्णाटकभाषया, आङ्गलभाषया, संस्कृतभाषया वा उत्तरं लिखत – 4 × 3 = 12

33. मेलुकोटेक्षेत्रे श्रीरामानुजाचार्यस्य योगदानं विवृणुत ।

34. कर्णार्जुनयोः युद्धं वर्णयत ।

35. दिलीपस्य शासनपद्धतिं विवृणुत ।

36. ''धूर्तो न सेव्यः'' पाठस्य कथासारांशं लिखत ।

**अथवा**

लक्ष्मीस्वरूपं वर्णयत ।

X. श्लोकद्वयं पूरयत – 2 × 4 = 8

37. कुण्डलीकृत ........................................................................।

........................................................................ नमोऽस्तु ते ॥

38. पत्रं पुष्पं ........................................................................

........................................................................ प्रयतात्मनः ॥



www.careerindia.com

CAREERINDIA



## भागः - B

### ( व्याकरणविभागः )

XI. निम्नलिखितेषु प्रश्नेषु अपूर्णविवरणेषु वा प्रत्येकाय चत्वारः विकल्पाः प्रदत्ताः । तेषु एकमेव शुद्धं उपयुक्तं वा वर्तते । उपयुक्तं विकल्पं चित्वा प्रश्नस्य समक्षे निर्दिष्टस्थाने अक्षरसहितम् अस्योत्तरं पूरयतु – 12 × 1 = 12

39. 'जनकः' अस्य समानार्थकपदम् एवम् अस्ति –

(A) जननी (B) जामाता

(C) पिता (D) जानकी ।

40. "अचिरेण" अस्य विरुद्धार्थकपदम् एवम् अस्ति –

(A) विचिरेण (B) सुचिरेण

(C) चिरेण (D) कुचिरेण ।

41. अत्र समूहेतरपदम् इदं भवति –

(A) क्षीरनिधाविव (B) योगेनान्ते

(C) तदन्वये (D) राजेन्दुः ।

42. "मनसि" अत्र एषा विभक्तिः –

(A) प्रथमा (B) पञ्चमी

(C) षष्ठी (D) सप्तमी ।

43. "हरिरेव" अत्र अयं सन्धिः –

(A) गुणः (B) विसर्गः

(C) पूर्वरूपः (D) पररूपः ।

44. 'देव इति' अत्र सन्धिविभागः एवं भवति –

(A) देवे + इति (B) देवो + इति

(C) देवः + इति (D) देव + इति ।

45. अत्र अयं समानाधिकरणबहुव्रीहिः –

(A) शूलं पाणौ यस्य सः (B) चक्रं पाणौ यस्य सः

(C) पद्मं नाभौ यस्य सः (D) लम्बम् उदरं यस्य सः ।



www.careerindia.com

CAREERINDIA



46. 'क्षणं क्षणं' अत्र समस्तपदम् एवं भवति –

(A) प्रतिक्षणम् (B) अनुक्षणम्

(C) अपिक्षणम् (D) निरीक्षणम् ।

47. ''शिष्याः'' अस्य एकवचनरूपम् एवम् अस्ति –

(A) शिष्य (B) शिष्यः

(C) शिष्यौ (D) शिष्ये ।

48. ''देवः'' अस्य अन्यलिङ्गरूपम् एवं भवति –

(A) देवा (B) असुरः

(C) देवी (D) मानवः ।

49. ''ध्येयोद्देशौ न तु भिन्नाः'' अत्र शुद्धं रूपम् इदम् अस्ति –

(A) ध्येयोद्देशौ न तु भिन्नौ (B) ध्येयोद्देशे न तु भिन्नौ

(C) ध्येयोद्देशे न तु भिन्ने (D) ध्येयोद्देशौ न तु भिन्नम् ।

50. ''अयच्छत्'' अत्र एषः लकारः अस्ति –

(A) लट् (B) लिट्

(C) लङ् (D) लिङ् ।

XII. चतुर्थपदं लिखत – $2 \times 1 = 2$

51. i) कुन्त्याः अपत्यं पुमान् – कौन्तेयः :: विनतायाः अपत्यं पुमान् – ................ ।

ii) निपुणस्य भावः - निपुणता :: समस्य भावः – ........................... ।

कृदन्तपदं चित्वा लिखत – $2 \times 1 = 2$

52. i) देवी विराजमाना अस्ति ।

ii) शिवेन लोकः रक्षितः ।



www.careerindia.com

CAREERINDIA



## भागः - C

### ( रचनाविभागः )

XIII. अलङ्कारं विवृणुत – 2

53. सोमदत्तः अभिमन्युः इव शूरः ।

XIV. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दसः नाम लिखत – 2

54. तावच्च तेन च तथा च तदा च तच्च ।

XV. पत्रं लिखत – 4

55. विरामसमये गृहम् आगन्तुं मित्रं प्रति पत्रं लिखत ।

**अथवा**

कक्ष्याध्यापकं प्रति विरामपत्रं लिखत ।

XVI. प्रबन्धम् लिखत – 5

56. सङ्गणकयन्त्रम् ।

**अथवा**

कर्नाटकराज्योत्सवः ।

XVII. गद्यभागं पठित्वा प्रश्नानां उत्तरं लिखत – $4 \times 1 = 4$

57. महाभारतस्य कर्ता वेदव्यासः । महाभारते अष्टादशपर्वाणि सन्ति । एकोत्तरशतं कौरवाः पञ्चपाण्डवाः प्रसिद्धाः । पाण्डवानां पिता पाण्डुमहाराजः आसीत् । कुन्ती पाण्डवानां माता आसीत् । कौरवाणां जनकः धृतराष्ट्रः । धृतराष्ट्रः हस्तिनापुरस्य चक्रवर्ती आसीत् ।

i) महाभारतस्य कर्ता कः ?

ii) महाभारते कति पर्वाणि सन्ति ?

iii) पाण्डवानां पिता कः ?

iv) धृतराष्ट्रः केषां जनकः ?

www.careerindia.com